6.3.1 The institution has effective welfare measures for teaching and non-teaching staff

**संस्थया अध्यापकेभ्यः अध्यापकेतरकर्मचारिभ्यश्च प्रभाविक्षेमोपायाः अनुस्रियन्ते।**

Answer:

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य अध्यापकाः अध्यापकेतरकर्मचारिणश्च तदीयाः मानवीयसम्पदः सन्ति। अतः एतेषां क्षेमाय विश्वविद्यालयः सर्वदा कटिबद्धः वर्तते। न केवलं कार्यरतस्यकर्मचारिणः अपि तु तस्य सम्पूर्णपरिवारस्य अपि क्षेमचिन्तनं विश्वविद्यालयः करोति। शारीरिकरूपेण मानसिकरूपेण पारिवारिकरूपेण आर्थिकरूपेण सामाजिकरूपेण च कर्मचारी सन्तृप्तः चेत्तर्हि सः विगतक्लेशः सन् विश्वविद्यालये स्वीयं कर्तव्योत्तरदायित्वादिकं सम्यक् निर्वोढुं प्रभवति न अन्यथा। अतः एव समेषाम् अध्यापकानाम् अध्यापकेतरकर्मचारिणां क्षेमाय नैके मार्गोपायाः विश्वविद्यालयेन अनुस्रियन्ते । क्रमशः यथा

**वैद्यकीयौषधोपचारसौकर्यम्, प्राथमिकोपचारव्यवस्था, वैद्यकीयविरमादयः संक्षेमोपायाः**

'शरीरमाद्यं खलु धर्मसाधनम्' इत्युक्तिं मनसि निधाय समेषां कर्मचारिणां स्वास्थ्यपरिरक्षणाय विश्वविद्यालयेन नानाविधानि सौकर्याणि प्रकल्पितानि सन्ति। विश्वविद्यालये प्राथमिकोपचारव्यवस्था सर्वेभ्यः विश्वविद्यालयीयेभ्यः निःशुल्कं परिकल्पिता अस्ति। आकस्मिकरूपेण क्षतिग्रस्तानां तात्कालिकरूपेण उपचाराय प्राथमिकोपचारपेटिकाः सर्वत्र स्वास्थ्यकेन्द्रे संस्थापिताः सन्ति। यदि नियतकर्मचारिणः गभीररूपेण अस्वस्थाः भवन्ति चेत्तर्हि रुग्णालयं गत्वा औषधोपचारं कर्तुं शक्नुवन्ति। वैद्यकीयविरामसौकर्यमपि प्रकल्पितानि सन्ति सर्वेभ्यः नियतकर्मचारिभ्यः । कोरोनाप्रतिरोधकसूचिकाः सर्वादौ निःशुल्कं सर्वेभ्यः कर्मचारिभ्यः प्रदानाय विश्वविद्यालयेन अपेक्षितव्यवस्था कृता।

**शैक्षिकपरिकरसौकर्याणि**

अध्यापकानाम् अध्यापकेतरकर्मचारिणां सन्ततयः सुशिक्षिताः भवेयुः इति कृत्वा ताभ्यः वार्षिकशैक्षिकपरिकराणां व्यवस्थापनाय शैक्षिकसौकर्यवेतनम् अतिरिक्तरूपेण दीयते। कर्मचारिणां सन्ततेः प्रवेशशुल्कम्, समवस्त्रशुल्कम्, वाहनशुल्कम्, पुस्तकशुल्कम् इत्यादीनि शुल्कानि दातुम् अपेक्षितः निर्दिष्टधनराशिः आयशुल्काद् बहिः दियते। अतः कर्मचारिणां परिवारोऽपि लाभान्वितः भवति।

**सञ्चारवेतनम्, महार्घतावेतनम्, भाटकगृहवेतनम् इत्यादीनि**

अध्यापकानाम् अध्यापकेतरकर्मचारिणां कृते सञ्चारवेतनम्, महार्घतावेतनम्, भाटकगृहवेतनम् इत्यादीनि विशिष्टानि वेतनसौकर्याणि विश्वविद्यालयेन दीयन्ते। मूलवेतनेन सह महार्घतावेतनं देशस्य आर्थिकमहार्घतां संवीक्ष्य सर्वकारेण निर्धार्यते। सर्वकारेण उद्घुष्टानां महार्घतावेतनादीनां

प्राप्तिः सकाले जायते इत्यतः विश्वविद्यालयस्य कर्मचारिणः सर्वे ससन्तोषं कार्यं कुर्वन्ति। यात्राप्रसङ्गेषु जायमानस्य अतिरिक्तयात्राव्ययस्य दायित्वं विश्वविद्यालयः एव वहति। भाटकगृहार्थमपि विशिष्टं सौकर्यं कल्पितं भवति। ये परिसरे वसन्ति तेभ्यः वासव्यवस्था, येनवसन्ति तेभ्यः वासधनं दीयते।

**कर्तव्यावकाशः , सामान्यावकाशः , प्रसवावकाशः , प्रसवित्र्याः पोषणावकाशः , शैक्षिकावकाशः , अध्ययनावकाशः इत्यादयः ।**

विश्वविद्यालयस्य कर्मचारिणः तस्य मूलसम्पदः सन्ति इत्यतः तेभ्यः विविधसन्दर्भेषु अपेक्षितानाम् अवकाशानां प्रदाने विश्वविद्यालयः सर्वदा उत्सुकोऽस्ति। प्रसवावकाशः , प्रसवित्र्याः पोषणावकाशः इत्यादयः अवकाशाः न कदापि निराक्रियन्ते। विषमपरिस्थितौ विश्वविद्यालयः कर्मचारिणा सह सन्तिष्ठते।

**गृहनिर्माणार्थं गणकयन्त्राद्यु पकारणानां क्रयणाय च साहाय्यम्**

गणकयन्त्राद्यु पकारणानां अनुप्रयोगेण कर्मचारिणः सर्वे सामयिकाः भवन्ति। अतः ५०, ००० रूप्यकाणि एतदर्थम् अग्रिमधनरूपेण स्वीकर्तुं शक्नुवन्ति। अनन्तरं क्रमशः स्वीकृतधनस्य प्रत्यर्पणं निर्धारितनियमानुगुणं कर्तव्यम्। एवमेव पदयोग्यतानुरूपं गृहनिर्माणाय निर्मितगृहस्वीकरणाय च अधिकाधिकम् एककोटिपर्यन्तमपि अग्रिमधनराशिरूपेण (मूलवेतनस्य १३६ गुणितः धनराशिः अग्रिमधनराशिरूपेण) कर्मचारी स्वीकर्तुं शक्नोति। सप्तमस्य वेतनायोगस्य क्रियान्वयनात् पूर्वं वाहनक्रमणाय द्विचक्रिकाक्रयणाय च अग्रिमधनराशिरूपेण विश्वविद्यालयः बहुभ्यः कर्मचारिभ्यः व्यवस्थाम् अकरोत्।

**यात्रासौकर्याणि**

विमानयात्रा, समुद्रमार्गयात्रा, स्थानीययात्रा, भारतदर्शनहेतुकी सविरामयात्रा, गृहगमनार्थकसविरामयात्रा, स्थानान्तरयात्रा, सेवानिवृत्तियात्रा, अग्रिमयात्रा इत्यादिषु यात्राप्रसङ्गेषु कर्मचारिभ्यः विशिष्टानि सौकर्याणि विश्वविद्यालयः प्रकल्पयति। भारतदर्शनादिषु सविरामयात्राप्रसङ्गेषु अर्जितविरामदिवसान् वेतनत्वेन परिवर्त्य सुखेन सपरिवारं यात्रां कर्तुम् अपि अवसरः वर्तते।

**स्वैच्छिकनिवृत्तिः , समयपूर्वनिवृत्तिः , चिकित्साधारितनिवृत्तिः , असाधारणनिवृत्तिः इत्यादिषु प्रसङ्गेषु सौकर्याणि।**

सेवात्यागप्रसङ्गेषु केन्द्रीयसंस्कृतविश्वविद्यालयस्य अध्यापकाः अध्यापकेतरकर्मचारिणश्च विशिष्टानि सौकर्याणि प्राप्स्यन्ति।

## सेवानिवृत्तेः सौकर्याणि

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य अध्यापकानां अध्यापकेतरकर्मचारिणां स्वाभाविकनिवृत्तिसन्दर्भे विशिष्टानि सौकर्याणि कल्पितानि सन्ति। स्वाभाविकनिवृत्तेः परमपि कार्यं कर्तुं निवृत्तिधनेन सह विशिष्टवेतनं दातुमपि अत्र अवसरः वर्तते। सेवावधौ मृतस्य कर्मचारिणः पाल्याय सेवाया अवसरः नियमानुसारं दीयते। निवृत्तस्य देहावसनात् परमपि विश्वविद्यालयः नियमानुगुणं व्यवस्थां करोति।

एतदतिरिच्य अन्यानि आरक्षितानां कृते नियुक्तौ सौकर्याणि यथा –

1. अनुसूचितजातीयानां जनजातीयानां क्षेमाय आरक्षणसौकर्याणि।
2. सामाजिकरूपेण शैक्षिकरूपेण च पृष्ठगामिनां क्षेमाय आरक्षणसौकर्याणि ।
3. पदाधारितानि आरक्षणसौकर्याणि ।
4. विकलाङ्गानाम् आरक्षणसौकर्याणि।
5. मेधाविनां क्रीडापटूनां कृते आरक्षणसौकर्याणि।
6. दुर्बलानाम् आरक्षणसौकर्याणि इत्यादीनि।

एवं बहुविधानि सौकर्याणि विश्वविद्यालयेन कल्पितानि सन्ति। विश्वविद्यालयः राज्यसर्वकारस्य कर्मचारिणां संक्षेमोपायानां निमित्तं विद्यमानान् सर्वकारीयान् अध्यादेशान् यथावत् परिपालयति। वेतनायोगस्य प्रतिवेदनं प्रतिवर्षं परिशील्य नवीनादेशान् यथावत् परिपालयन् स्वस्य अध्यापकाः अध्यापकेतरकर्मचारिणश्च यथा ससुखं सक्षेमं च जीवनं यापयेयुः तथा व्यवस्थां कल्पयति ।

उत्सवप्रियाः भारतीयाः । अतः स्थानीयोत्सवसन्दर्भेषु (सावन/नवरात्र, दीपावली इत्यादिषु) स्थानीयपरिवेषं मनसि निधाय विशेषावकाशाः कर्मचारिभ्यः दीयन्ते। उत्सवार्थमेव अग्रिमवेतनरूपेणापि शिक्षकेतरकर्मचारिणां कृते निर्दिष्टः धनराशिः प्रदीयते। एतद्विहाय मानवीयदृष्ट्या विश्वविद्यालयीयकर्मचारिणां क्षेमाय सर्वे सदस्याः च साहाय्यं व्यक्तिशः अपि कुर्वन्ति।

## शिक्षण एवं शिक्षणेतर वर्ग के कल्याणकारी प्रकल्पों हेतु सक्रिय निकाय एवं समिति –

- **स्वास्थ केन्द्र**
- **शिकायत निवारण प्रकोष्ठ**
- **अध्यापक परिषद्**
- **कर्मचारी संघ**
- **यौन प्रतिषेध समिति**
- **कर्मचारी कल्याण कोष**